IJCRT.ORG ISSN : 2320-2882
INTERNATIONAL JOURNAL OF CREATIVE RESEARCH THOUGHTS (IJCRT)
An International Open Access, Peer-reviewed, Refereed Journal

# गृहारम्भे पञ्चाङ्गशुद्धिः

**डॉ. सोनू शर्मा**

**गॉव-कनौह, जिला-हिसार, हरियाणा**

तिथिशुद्धि: -

यदि वयं गृहस्य निर्माणं द्वितीया, पंचमी, तृतीया, षष्ठी, सप्तमी, दशमी एकादशी, द्वादशी, त्रयोदशी तथा च पूर्णिमादिषु तिथिषु कुर्वन्ति चेत् तदा शुभफलप्रदायका: भवन्ति । यदि वयं प्रतिपदा तिथौ गृहस्य निर्माणं कुर्वन्ति चेत् तदा धनहानिं भवति । यदि गृहस्य निर्माण अष्टमीतिथौ भवति तदा उच्चाटन भवति तथाच नवमीतिथ्यां गृहस्य निर्माणं कुर्वन्ति तदा धान्यस्य नाशं भवति । यदि वयं अमावस्यां गृहस्य निर्माणं कुर्वन्ति चेत् तदा राजभयं भवति तथाच चतुदर्शीतिथ्यां गृहस्य निर्माणं भवति तदा स्त्रीविनाशः भवति । यथोक्तं वास्तुरत्नाकरे-

**द्वितीया पञ्चमी मुख्या तृतीया षष्ठिका तथा ।**

**सप्तमी दशमी चैव द्वादशयेकादशी तथा ।**

**त्रयोदशी पञ्चदशी तिथयः स्युः शुभावहाः ।**

**दारिद्रयं प्रतिपत्कुर्याच्चतुर्थी धनहारिणी ।**

**अष्टम्युच्चाटनं चैव नवमी शस्यघातिनी ।**

**दर्शे राजभयं ज्ञेयं भूते दारविनाशम् ॥'१**

**वारशुद्धिः-**

वयं सूर्यचन्द्रगुरुबुधशुक्रादि वारेषु गृहारम्भः करणीयः। परन्तु 'आदित्यभौमवर्जन्तु सर्वे वाराः शुभावहाः' इति वयं गृहसम्बन्धीसम्पूर्णकार्य दिने एवं करणीय परन्तु कुत्रचित् कस्यचितमतमस्ति यत् रात्रौऽपि प्रवेशः भवितुं शक्यते। उक्तञ्च-

**सौरेन्दुजीवसौम्यानां भार्गवस्य च वासरे।**

**सूतपादिकं कार्यमिष्टं समाभिवाञ्छता।**

**कृत्यं वेश्मभवं दिवैव विहितं रात्रौ प्रवेशः क्वचित् ॥'२**

**नक्षत्रशुद्धिः**

यदि वयं गृहस्य निर्माण उत्तरात्रय (उत्तराफाल्गुनी, उत्तराषाढ़ा, उत्तरभाद्रपद) रोहिणी, पुष्य, मृगशिरा, अनुराधा हस्त, चित्रा, धनिष्ठा, शतभिषा तथा च रेवत्यादिषु नक्षत्रेषु कुर्वन्ति चेत् तदा गृहारम्भं प्रशस्तं भवति । यथोक्तम् वास्तुरत्नाकरे-

**उत्तरेपि च रोहिण्यां पुष्ये मैत्रे करद्वये ।**

**धनिष्ठाद्रि तये पौष्णे गृहारम्भः प्रशस्तये।'३**

वास्तुमाणिक्यरत्नाकरे-

**रोहिण्यां त्र्युत्तरे पुष्ये मृगे मैत्रे करत्रये ।**

**वसुद्वये हि रेवत्यां गृहारम्भः सुखप्रदः ।।'४**

यथोक्तं पीयूषधारायां पराशरः -

**चित्राशताभिषक्स्वाती हस्तः पुष्यः पुनर्वसुः ।**

**रोहिणी रेवती मूलं श्रवणोत्तरफाल्गुनी ॥**

**धनिष्ठा चोत्तराषाढ़ा तथा भाद्रपदोत्तरा ।**

**अश्विनी मृगशीर्षे द्वे अनुराधा तथैव च ॥**

**वास्तुपूजनमतेषु नक्षत्रेषु करोति यः ।**

**स प्राप्नोति नरो लक्ष्मीमिति प्राह पराशरः ॥'५**

सप्तश्लाकाचक्रे ईशानकोणतः कृतिमादाय नक्षत्राणां न्यासं कुर्वन्ति चेत् तदा नक्षत्रं यदि वास्तुनक्षत्रं तथा च चन्द्रनक्षत्रं पुरः पृष्ठे भवति तदा शुभं न भवति तथा च पार्श्वेभवति चेत् तदा शुभं भवति। उक्तञ्च-

**चक्रे सप्तश्लाकाख्ये कृतिकादिनि विन्यसेत्॥**

**ऋक्षं चन्द्रस्य वास्तोश्च पुरः पृष्ठे च नो शुभम्॥"६**

अत्र कृत्तिकानक्षत्रः आरभ्य आश्लेषा नक्षत्र पर्यन्त पूर्वदिशायाः, मघानक्षत्रात् आरभ्य विशाखानक्षत्रं पर्यन्तं दक्षिणदिशायाः, अनुराधानक्षत्रतः श्रवणनक्षत्रपर्यन्त पश्चिमदिशायाः तथा च धनिष्ठा नक्षत्रतः आरभ्यः भरणीनक्षत्रपर्यन्त उत्तरदिशायाः नक्षत्राणि सन्ति। यदि पूर्वदिशायाः नक्षत्रेषु कोऽपि नक्षत्रं भवति तदा पश्चिमदिशायाः नक्षत्रेषु कोऽपि नक्षत्रं भवति तदा पश्चिमदिशायाः नक्षत्रेषु तथा च पश्चिमदिशायाः नक्षत्रेषु कोऽपि नक्षत्रं भवति चेत् तदा पूर्वादिदिशाषु नक्षत्रेषु गृहारम्भ अशुभं भवति। अर्थात् पूर्वपश्चिमदिशायाः नक्षत्रं भवति चेत् तदा उत्तरक्षिणनक्षत्रेषु तथा च उत्तरदक्षिण दिशायाः नक्षत्रं भवति तदा पूर्वपश्चिमदिशायाः नक्षत्रेषु गृहारम्भः उत्तमः भवति।

**योगशुद्धिः-**

यदि वयं वज्रः, व्याघात्, शूल, व्यतीपात, अतिगण्ड : विष्कुम्भ, परिघादिषु अष्टषु योगेषु गृहारम्भः कुर्वन्ति चेत् तदा शुभं न भवति। अतः शेषे योगेषु गृहारम्भः भवति चेत् तदा शुभं भवति यथोक्तं वास्तुरत्नाकरे-

**वज्रन्याघातशूलेषु व्यतीपातातिगण्डयोः।**

**विष्कुम्भगण्डपरिधे चाष्टयोगे न कारयेत्॥७**

वास्तुराजवल्लभकारानुसारेण वैधृतिगण्डशूलव्याघातपरिघवज्रादियोगेन त्यक्त्वा अवशिष्टेषु योगेषु गृहारम्भः शुभं भवति। उक्तं च राजवल्लभे -

**निन्द्यौ भुसुतभास्करौ च शुभदा पूर्णा च नन्दातिथिः।**

**तेषां वैधृति शूलगाण्डपरिधव्याघातवज्रा अपि।।"८**

ग्रन्थान्तरे मुहूर्त विषये कथितमस्ति यत् स्वाति, अनुराधा, ज्येष्ठा, गन्धर्व (धनिष्ठा) पूर्वाफाल्गुनी, रोहिणी, मूल, हस्त एतेषु सप्तेषु मुहूर्तेषु गृहारम्भः करणीयः यतोहि एतेषु नक्षेत्रुषु शुभं भवति। उक्तञ्च-

**स्वैत्रे मैत्रेऽथ माहेन्द्रे गान्धर्वे भगरोहिणी।**

**तथा वैरोचे सावित्रे मुहूर्ते गृहमारभेत्॥९**

मत्स्यपुराणेऽपि उक्तं यत् गृहस्य आरम्भः व्याघात्, व्यतिपात्, शूल, अतिगण्डः एतेषु योगेषु नैव करणीयः तथा च गण्डः, विष्कम्भः परिघः, वज्रादिषु योगेषु करणीयः यतोहि एताः योगाः शुभाः भवन्ति। उक्तञ्च-

मत्स्यपुराणे-

**वर्ज्यव्याघात्शले च व्यतिपाताऽतिगण्डयोः।**

**विष्कुम्भगण्डपरिधवज्रयोगेषु कारयेत्॥१०**

**करणशुद्धिः-**

तिथ्यार्ध भागं करणं उच्यते। ये करणानि किञ्चिद् तिथिषु निश्चितरूपेण भवन्ति ते स्थिरकरणानि उच्यन्ते। यथा - कृष्णपक्षस्य चतुर्दशीतियां उत्तरार्धे शकुनि तथा च शुक्लपक्षस्य प्रतिपदा तिथ्यां पूर्वार्द्धे किन्स्तुघ्न करणं सदैव भवति। अतः एते स्थिरकरणानि उच्यन्ते चत्वारि करणानि स्थिराः भवन्ति। सप्त करणानि चराः भवन्ति।

चरकरण ज्ञानम्-

**करणानि चराख्यानि बवबालवकौलवम्**

**तैतिलं गरवाणिज्ये विष्टिरेतानि सप्त च।"११**

स्थिरकरणज्ञानम्-

**परे कृष्णचतुर्दश्यां दले च शकुनिभवेत्।**

**दर्शे चतुष्पदं नागं पूर्वापरविभागयोः॥**

**शुक्ले प्रतिपदः पूर्वे दले किंस्तुघ्नसंज्ञकम्**

**एतेषां करणानां हि चतुष्कं स्थिरसंज्ञकम्॥**

शकुनि, चतुष्पाद, नाग, किंस्तुघ्न, गर तथा च विष्टि एतानि करणानि अशुभाः भवन्ति अतः एतेषु करणेषु गृहारम्भः नैव करणीयम्।

यदि वयं भद्रा (विष्ट) समये गृहस्य निर्माणं कुर्वन्ति चेत् तदाऽपि अशुभं भवति यतोहि भद्रा समयं त्याज्यं भवति। विष्टेः नाम भद्रा अस्ति । एषा भद्रा शुक्ल पक्षस्य अष्टमी एवं पूर्णिमायां पूर्वार्द्ध तथाच चतुर्थी एवम् एकादशी तिथ्याम् उत्तरार्द्ध भवति । एषा कृष्ण पक्षे तृतीयदशमी तिथौ उत्तरार्द्ध तथा च सप्तमी चतुर्दशीतिथौ पूर्वार्द्धं भवति । सामान्यतया भद्रायां संस्कारः तथा च माङ्गलिककार्य निषेधः भवति । भद्राविषये श्लोकमस्ति -

**शुक्ले पूर्वार्द्धेऽष्टमीपञ्चदश्योर्भद्रैकादश्यां चतुर्थ्यां परार्द्ध ।**

**कृष्णेऽन्यार्धे स्यातृतीयादशम्योः पूर्वे भागे सप्तमीशम्भुतिथ्योः ॥"१२**

परञ्च भद्राविषये परिहारविषये मतान्तरमस्ति यत्-

**स्वर्गे भद्रा धनं धान्यं पाताले च धनागमः ।**

**मृत्युलोके सदा त्याज्या स्वर्गपातालगा शुभा ॥**

**सन्दर्भग्रन्थसूचि: -**


१. वास्तुरत्नाकर, पृष्ठसंख्या-१०१

२. तत्रैव

३. तत्रैव

४. वास्तुमणि रत्नाकर: श्लोक संख्या - ११७

५. वास्तुरत्नाकर: पृष्ठ संख्या - १०१-१०२

६. तत्रैव पृष्ठ संख्या - १०२

७. तत्रैव श्लोक संख्या - ३२

८. वास्तुराजवल्लभ: उल्लेख बृहद्वास्तुमालाप्रयोग: श्लोक संख्या - ७०

९. वास्तुरत्नाकर: श्लोक संख्या - ३३, पृष्ठ संख्या - १०३

१०. मत्स्यपुराण, गृहनिर्माण कालवर्णनम् - श्लोक ७१/१-८ पूर्वार्द्ध:

११. मुहूर्तगणपति: पृष्ठ संख्या ३४ करणप्रकरणम्

१२. मुहूर्तचिन्तामणि श्लोक सं. ४३, प्रकरण - १